# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१६)

२४.१०.२०११

# पुनरावर्तनम् - जकारान्ताः पुंलिङ्गाः

- युज् (युजिर् योगे धातोः क्विन्प्रत्ययान्तः)
- सौ 'क्विन्प्रत्ययान्तस्य कुः' - युङ् ।
- सर्वनामस्थानेषु 'युजेरसमासे' इति नुमागमः - युञ्जौ, युञ्जः ।
- भ्यामादिषु 'चोः कुः' - युग्भ्याम्, युग्भिः ।

- सुयुज्
- नुमागमो न ।
- सौ, भ्यमादिषु च 'चोः कुः' - सुयुक्/सुयुग्, सुयुजौ... सुयुग्भ्याम् ।

# पुनरावर्तनम् - जकारान्ताः पुंलिङ्गाः

- युज् (युज समाधौ धातोः क्विप्-प्रत्ययान्तः)
- नुमागमो न ।
- सौ, भ्यमादिषु च 'चोः कुः' - युक्/युग्, युजौ... युग्भ्याम् ।

- खञ्ज् शब्दः ।
- संयोगान्तलोपः । अनुस्वारपरसवर्णयोर्निवृत्तिः । खन्, खञ्जौ, खञ्जः ।
- खन्भ्याम् । खन्त्सु/खन्सु ।

# पुनरावर्तनम् - जकारान्ताः पुंलिङ्गाः

- राज्, विभ्राज् (टुभ्राजृ दीप्तौ), देवेज्, विश्वसृज्, परिमृज्
- पदान्ते 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति षत्वम्, जश्त्वम् ।
- राट्/राड्, राजौ, राजः ।
- राजा, राड्भ्याम् इत्यादि ।

- विभ्राज् (भ्राजृ दीप्तौ) ।
- षत्वं न । 'चोः कुः' इति कुत्वम् ।
- विभ्राक्/विभ्राग्, विभ्राजौ, विभ्राजः ।
- विभ्राजा, विभ्राग्भ्याम् इत्यादि ।

- परिवृज्-शब्दः ।
- ‘परौ व्रजेः षः पदान्ते’ (उ २१७)
- परौ उपपदे व्रजेः क्विप् स्याद् दीर्घश्च पदान्तविषये षत्वं च ।
- परि व्रज् (क्विप्) व्
- परिव्राज् व्
- परिव्राज् (‘वेरपृक्तस्य’ - ६.१.६७)

- परिव्राज् (सुँ) स्
- परिव्राज्  ('हल्ङ्याब्भ्यो...' - ६.१.६८)
- परिव्राष्  ('परौ व्रजेः षः पदान्ते')
- परिव्राड्  ('झलां जशोऽन्ते' - ८.२.३९)
- परिव्राट्  ('वाऽवसाने' - ८.४.५६)

- परित्यज्य सर्वं व्रजतीति परिव्राट् ।
- परिव्राजौ, परिव्राजः ।
- परिव्राजा, परिव्राड्भ्याम् इत्यादि ।

# ३७९. विश्वस्य वसुराटोः (६.३.१२८)

- पदद्वयम् ।
- 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६.३.१११) इत्यतः 'दीर्घः' इति अनुवर्तते ।
- विश्वशब्दस्य दीर्घः अन्तादेशः स्याद् वसौ राट्-शब्दे च परे ।
- विश्वं वसु यस्य सः विश्वावसुः ।
- राडिति पदान्तोपलक्षणार्थम् । चर्त्वम् अविवक्षितम् ।
- विश्वाराट्/विश्वाराड् । (व्रश्चभ्रस्ज... इति षत्वम्, जश्त्वम्)
- विश्वराजौ, विश्वराजः ।
- पदान्तत्वाभावे दीर्घो न ।
- विश्वाराड्भ्याम् इत्यादि ।

- ‘भ्रस्ज पाके’ ।
- भ्रस्ज्  (क्विप्) व्
- भ् र् अ स्ज्      व् (‘ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च’ - ६.१.१८ - इति संप्रसारणम्)
- भृस्ज्                           व्  (‘संप्रसारणाच्च’ - ६.१.१०८ - इति पूर्वरूपम्)
- भृस्ज्                           (‘वेरपृक्तस्य’ - ६.१.६७ - इति वलोपः)

- भृस्ज् (सुँ) स्
- भृस्ज्                           (‘हल्ङ्याब्भ्यो...’ - ६.१.६८)

# ३८०. स्कोः संयोगाद्योरन्ते च (८.२.२९)

- चत्वारि पदानि । स्कोः, संयोगाद्योः, अन्ते, च ।
- 'पदस्य' (८.१.१६) इति अधिक्रियते । 'संयोगान्तस्य लोपः' (८.२.२३) इत्यतः 'लोपः' इति, 'झलो झलि' (८.२.२६) इत्यतः 'झलि' इति च अनुवर्तते ।
- पदान्ते झलि च परे यः संयोगः तदाद्योः सकारककारयोः लोपः स्यात् ।

- भृस्ज्
- भृज् (‘स्कोः संयोगाद्योरन्ते च’ - ८.२.२९)
- भृष् (‘व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः’ - ८.२.३६)
- भृड् (‘झलां जशोऽन्ते’ - ८.२.३९)
- भृट् (‘वाऽवसाने’ - ८.४.५५)

- भृस्ज्  औ
- सस्य श्चुत्वेन शः, तस्य जश्त्वेन जः ।
- भृश्ज्  औ  ('स्तोः श्चुना श्चुः' - ८.४.४०)
- भृज्जौ  ('झलां जश् झशि' - ८.४.५३)

- भृज्जः ।
- भृज्जा, भृड्भ्याम् इत्यादि ।

- ‘ऋत्विग्...’ इत्यादिना ऋतौ उपपदे यजेः क्विन्, क्विन्नन्तत्वात् कुत्वम्, ऋत्विक्, ऋत्विग् ।
- ऋतुः - गमनं, प्राप्तिः । दक्षिणाद्रव्यलाभो विवक्षितः । तस्मिन्निमित्ते यजन्ति इत्यर्थे,
- ऋतु यज् (क्विन्) व् (‘ऋत्विग्-दधृक्...’ - ३.२.५९)
- ऋतु इ अज् व् (‘वचिस्वपियजादीनां किति’ - ६.१.१५ - इति संप्रसारणम्)
- ऋतु इज् व् (‘संप्रसारणाच्च’ - ६.१.१०८ - इति पूर्वरूपम्)
- ऋत्विज् व् (‘इको यणचि’ - ६.१.७७)
- ऋत्विज् (‘वेरपृक्तस्य’ - ६.१.६७)

- ऋत्विज्   (सुँ) स्
- ऋत्विज्   ('हल्ङ्याब्भ्यो..' - ६.१.६८)
- ऋत्विग्   ('क्विन्प्रत्ययस्य कुः' - ८.२.६२)
- ऋत्विक्   ('वाऽवसाने' - ८.४.५६)
- ऋत्विजौ, ऋत्विजः ।
- ऋत्विग्भ्याम् ।
- 'चोः कुः' (८.२.३०) इति कुत्वे प्राप्ते,
- तस्य अपवादत्वात् 'व्रश्चभ्रस्ज..' (८.२.३६) इति षत्वे प्राप्ते,
- विशेषेण विहितत्वात् तदपि बाधित्वा 'क्विन्प्रत्ययस्य कुः' इति कुत्वम् ।

- ऊर्ज् बलप्राणनयोः ।
- ऊर्ज् इ ('सत्यापपाश..' - ३.१.२५ - इति स्वार्थे णिच्)
- ऊर्ज् इ (क्विप्) व् ('भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्' - ३.२.१७७)
- ऊर्ज् व् ('णेरनिटि' - ६.४.५१ - इति णिलोपः)
- ऊर्ज् ('वेरपृक्तस्य' - ६.१.६७ - इति वलोपः)

- ऊर्ज् (सुँ) स्
- ऊर्ज्  ('हल्ङ्याब्भ्यो...' - ६.१.६८)
  - 'रात्सस्य' इति नियमात् न संयोगान्तलोपः ।
- ऊर्ग्  ('चोः कुः' - ८.२.३० - इति कुत्वम्)
- ऊर्क्  ('वाऽवसाने' - ८.४.५६)
- ऊर्जौ, ऊर्जः ।